# नवमन्गाली स्तोत्र

1. कात्यायनी महामाये भवानि भुवनेश्वरी
संसार सागरे मग्नात् उद्धर श्री कृपामयी

2. धन्योहं अतिभाग्योहं भावितोहं महात्मभिः
यत्पृष्टं सूमहत् पुण्यं पुराणं वेदविद्दतं

3. नमो देव्यै प्रकृत्यै च विधात्र्यै सततं नमः
कल्याण्यै कामदायै च वृद्ध्यै सिद्ध्यै नमो नमः

4. सच्चिदानन्द रूपिण्यै संसारारणये नमः
पञ्चकृत्यै विधात्र्यै च भुवनेश्वर्यै नमो नमः

5. क्रीडा ते लोकरचना सखा ते चिन्मयः शिवः
आहारस्ते सदानन्दः वासस्ते हृदयं मम

6. नमः शिवायै कल्याण्यै शांत्यै पुष्ट्यै नमो नमः
भगवत्यै नमो देव्यै रुद्रायै सततं नमः

7. जय जय जयाधारे जयशीले जयप्रदे
यज्ञ सूकर जाये त्वं जयदेवी जयावहे

8. सुखदे मोक्षदे देवी प्रसन्ना भव सुन्दरी
पुष्पसारा नन्दनीये तुलसी कृष्ण जीवनी

9. नमस्ते तुलसी रूपे नमो लक्ष्मी सरस्वती
नमो दुर्गे भगवती नमस्ते सर्व रूपिणी